# शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

## साहित्य दर्पणः द्वितीयः परिच्छेदः

### साहित्यिकाः कुत्र शक्तिग्रहं मन्यन्ते कुत्र न इति यथाशास्त्रं प्रतिपादनम्

साहित्य दर्पणस्य द्वितीयपरिच्छेदे आचार्य विश्वनाथेन महाभाष्यकारस्य 'चतुष्टयी शब्दानां प्रवृत्तिः' इति मत्वा चतुर्विधाः शब्दाः वर्ण्यन्ते। जाति शब्दाः, गुणशब्दाः, क्रिया शब्दाः, द्रव्य शब्दाश्चेति चतुर्विधाः।

तत्र गो पिण्डादिषु गोत्वादिका जातिः। गुणो विशेषाधान हेतुः सिद्धो वस्तुधर्मः। शुक्लादयो हि गुणाः गवादिकं सजातीयेभ्यः कृष्ण गवादिभ्यो व्यावर्तयन्ति। क्रियाः साध्य रूपाः वस्तुधर्माः पाकादयः। एषु हि अधिश्रयणावश्रयणान्तादि पूर्वापरीभूतो व्यापार कलापः पाकादिशब्द वाच्यः। द्रव्यशब्दा एक व्यक्तिवाचिनो हरिहरडित्थडवित्थादयः। द्रव्य शब्दा एव यदृच्छा शब्दाः। एतेष्वेव व्यक्तेः उपाधिषु सङ्केतो गृह्यते न व्यक्तौ। आनन्त्य व्यभिचार दोषपातात्। उक्तं हि ग्रन्थकारेण —

'सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च' इति।

ननु व्यक्तौ शक्तिग्रहे कथम् आनन्त्यं व्यभिचारश्चेति चेत्? श्रूयताम् —

उपाधिषु शक्तिं स्वीकारे एकस्यां व्यक्तौ जाति शक्तौ गृहीतायां सर्वत्र कार्यं चलति। सामान्य लक्षणासत्तिकर्षेण सर्वासां बोधश्च भवति। यदि व्यक्तौ शक्तिग्रहः स्वीक्रियते तदायं प्रश्नो जागर्ति यद् – एकस्यां व्यक्तौ सङ्केतग्रहो भवति उत सर्वस्याम्? तत्र न प्रथमः, गवादीनां व्यक्तीनाम् अनन्तत्वात्, अनन्त व्यक्तिषु अनन्त शक्ति कल्पना गौरवात् आनन्त्यं स्यात्। एकस्यामेव द्रव्य व्यक्तौ शक्तिग्रहे तदतिरिक्तानां गो व्यक्तीनां भानमेव न स्यादिति व्यभिचारः पदार्थोपस्थितौ शक्तिग्रहस्य कारणत्वात्। न चैकस्यां व्यक्तौ शक्तिग्रहे अन्यासां व्यक्तीनां शक्तिग्रहं विनैव उपस्थितिरिति वाच्यम्, शक्तिग्रहं विना पदार्थोपस्थितौ स्वीकृतायां कारणाभावे कार्योत्पत्ति रूप व्यभिचार दोषपातात्। अपि चैवं गोशब्देन अश्वादीनामपि उपस्थितिः स्यात्। नापि द्वितीयः – भूत-भविष्य-वर्तमानानां समस्तानां गो-व्यक्तीनां एकस्मिन् समये उपस्थित्यभावेन शक्तिग्रहासम्भवादिति दिक्।

—

उपेन्द्र झा
शा॰प्र॰
एसो॰ प्रो॰ साहित्य
स॰ उ॰ सं॰ महावि॰
कुरसेला, पूर्णियाँ

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
(साहित्य दर्पण: पञ्चम परिच्छेद:)

लक्षणाऽभिधे रसस्य बोधिके न वा ?
इति विचारम् ।

'प्रागसत्त्वाद्रसादेर्नो बोधिके लक्षणाभिधे ।
किञ्च मुख्यार्थबाधस्य विरहादपि लक्षणा ॥'

कुतो नेति चेद् ! नन्तु लक्षणया अभिधया वा रसादेर्बोध: ? न, शब्दव्यापारात् पूर्वं रसस्य सत्त्वैव न स्वीक्रियते । अतो रसस्य लक्षणाभिधे न बोधिके । अभिधया लक्षणया च विद्यमान वस्तुन एव बोधात् । 'गङ्गायां घोष:' इत्यत्र गङ्गातटश्च पूर्वं सिद्धौ । अतो गङ्गापदम् अभिधया प्रवाहं लक्षणया च तटं बोधयति । असिद्धे वस्तुनि न तयो: प्रयोग: । न हि रसोऽन्यो रसनात्मकं व्यापारात् भिन्नो रसादि प्रतिपाद्य: कोऽपि पदार्थ: प्रमाण सिद्धोऽस्ति । यम् इमे लक्षणाभिधे बोधयेताम् ।

किञ्च मुख्यार्थस्य बाधदशायामेव लक्षणाया: अवतार: । उक्तञ्च उदयनाचार्येण —

'श्रुतान्वयादनाकाङ्क्षं वाक्यं ह्यन्यदिच्छति ।
पदार्थान्वय वैधुर्यात्तदाक्षिप्तेन सङ्गति: ॥'

साक्षात् श्रुत पदानां (पदार्थानां) परस्परं अन्वय बोधे जाते वाक्यं न किमपि अन्यत् इच्छति । किन्तु यदि परस्परं अन्वयस्य वैधुर्यम् = अनुपपत्ति: भवति तदा आक्षिप्तेन = बोधअन्य सम्बन्धेन अर्थेन सङ्गति: = अर्थात् अन्वयो विधीयते । किन्तु 'शून्यं वासगृहं' इत्यादि रसोदाहरणे न मुख्यार्थ बाध इति न लक्षणाया अवसर: ।

न च 'गङ्गायां घोष:' शीत इत्यत्र शीतपावनत्वादिकं प्रयोजनं लक्ष्यम् = लक्षणया बोध्यम् । एवं सति गङ्गापदस्य तटरूपोऽर्थो मुख्य: स्वीकर्तव्यो भविष्यति । स च बाधितोऽपि भविष्यति । शीतत्व पावनत्वादे: प्रयोजनस्य लक्ष्यतया तस्यापि प्रयोजनान्तरम् । एवं मूलक्षतिकारी अनवस्था भवेत् ।

न प्रयोजन विशिष्टे तीरे लक्षणेति वाच्यम् । विषयं प्रयोजनयो: युगपत् प्रतीति अनभ्युपगमात् । नीलादि संवेदनान्तरमेव हि ज्ञातताया: अनुव्यवसायस्य वा सम्भव: । अतो न लक्षणाभिधे रसस्य बोधके इति सिद्धम् ।

उपेन्द्र झा
शो०छा०
सहा०प्रा० साहित्य
रा० उ० सं० महा०वि०
डुमरैला, पूर्णियाँ

शास्त्री तृतीय खण्डस्य छात्रे (साहित्यम्)
साहित्य दर्पणः अष्टमः परिच्छेदः

गुणालङ्कारयोः भेद प्रदर्शन पूर्वकं
गुणस्य लक्षण विवेचनम्।

ननु लोके गुणाः शौर्यादयः समवायेन हारादयः अलंकाराः शरीरे संयोग सम्बन्धेन इति लोके गुणालंकार भेदो भवतु नाम काव्ये पुनः माधुर्यादीनां गुणानां उपमादीनाम् अलंकाराणां समवायेनैव स्थित्या गुणालंकारयोः भेद इति न वाच्यम्। यथाहि लोके अङ्गित्वम् आश्रयस्य आत्मन उत्कर्ष हेतुत्वात् शौर्यादयो: गुणशब्द वाच्याः तथा काव्येऽपि अङ्गित्वेन आश्रयस्य रसस्य धर्माः स्वरूप विशेषाः माधुर्यादयोऽपि स्वाश्रय रस व्यञ्जके वाक्यस्य काव्य व्यपदेशः औपाधिकोऽनु गुणयं भाजः इत्यर्थः। एवं काव्यं व्यवहार प्रयोजकत्वे सति रस धर्मत्वं गुणत्वम् इति। इत्थम् अपि व्याप्ति वारणाय सति अन्तरम्। अलंकारेऽपि व्याप्तिवारणाय विशेष्यदलम्। एतेनेदं सिद्धं यत् - रस मात्र धर्मत्वम् गुणत्वम्, शब्दार्थ धर्मत्वम् अलङ्कारत्वम् इति।

अपि च यथा लोके: धर्माः शौर्यादयः नियताः अपरिहार्याश्च तथैव काव्यस्य आत्मभूते रसे गुणानां स्थितिः नियता अपरिहार्या च। परन्तु अलङ्काराणाम् अपरिहार्यता न इति अपि सिद्धम्।

उपेन्द्र झा
५/४/२०
एसो० प्रो० साहित्य
श्री० उ० सं० महावि०
फुलवरिया, प्रडियो